# द्वे कथे – स्वामिविवेकानन्दस्य।

**अवबोधनम्।**

**अ. एकवाक्येन उत्तरं लिखत।**

*१. नरेन्द्रेण **किं** क्रीतम्?

**उत्तर:** नरेन्द्रेण **दुर्गादेव्या: मूर्ति:** क्रीता।

*२. **कस्य** अश्वयानं मार्गे आसीत्?

**उत्तर:** **मण्डलाधिकारिण:** अश्वयानं मार्गे आसीत्।

*३. मात्रा नरेन्द्राय **किं** कथितम्?

**उत्तर:** मात्रा नरेन्द्राय कथितं, **"वत्स नरेन्द्र, विरम शोकात्। यद्यपि त्वया मूर्ते: पूजा न कृता तथापि बालिकाया: साहाय्यं कृत्वा बालिकारूपशक्तिदेवताया: एव पूजनं कृतम्" इति।**

४. बालनरेन्द्र: **किं** जानाति स्म?

**उत्तर:** **दुर्गापूजामहोत्सव: नाम शक्तिपूजनम् इति** बालनरेन्द्र: जानाति स्म।

५. नरेन्द्रेण सहसा **किं** दृष्टम्?

**उत्तर:** नरेन्द्रेण सहसा दृष्टं **यत् काचन बालिका मार्गे खेलने मग्नास्ति।**

६. गृहमागते नरेन्द्रेण **किं** ज्ञातम्?

**उत्तर:** गृहमागते नरेन्द्रेण ज्ञातं **यत् तस्य हस्तात् च्युता मूर्ति: तत्रैव मार्गे भग्ना वर्तते।**

७. **क:** सदैव चिन्तनमग्न: आसीत्?

**उत्तर:** **बालनरेन्द्र:** सदैव चिन्तनमग्न: आसीत्।

८. **केषां** रवेण नरेन्द्रस्य विचारमाला खण्डिता?

उत्तर: **तुरगपदानाम्** रवेण नरेन्द्रस्य विचारमाला खण्डिता।

९. नरेन्द्र: **किमर्थं** मार्गाद् दूरं गन्तुं प्रायतत?

उत्तर: नरेन्द्र: **स्वसंरक्षणाय** मार्गाद् दूरं गन्तुं प्रायतत।

१०. नरेन्द्रस्य हस्तात् **का** पतिता?

उत्तर: नरेन्द्रस्य हस्तात् **मूर्ति:** पतिता।

**ब. रिक्तस्थानपूर्तिं कुरुत।**

*१. अकस्मात् तस्य विचारमाला ________ ।

(खण्डित: / खण्डिता / खण्डितम्)

उत्तर: अकस्मात् तस्य विचारमाला **खण्डिता।**

*२. नरेन्द्रस्य ________ मूर्ति: पतिता।

(हस्तेन / हस्तात् / हस्तस्य)

उत्तर: नरेन्द्रस्य **हस्तात्** मूर्ति: पतिता।

३. दुर्गादेव्या: मूर्तिं ________ स: गृहमागच्छत्।

(क्रीत्वा / कृत्वा / क्रीडित्वा)

उत्तर: दुर्गादेव्या: मूर्तिं **क्रीत्वा** स : गृहमागच्छत्।

४. स: शक्ते: ________ मग्नोऽभवत्।

(स्वरूपचिन्तनस्य / स्वरूपचिन्तनात् / स्वरूपचिन्तने)

उत्तर: स: शक्ते: **स्वरूपचिन्तने** मग्नोऽभवत्।

५. बालिका मार्गे ________ मग्नास्ति।

(खेलनम् / खेलने / खेलनाय)

उत्तर: बालिका मार्गे **खेलने** मग्नास्ति।

६. तेन बालिका तस्याः _______ प्रदत्ता।

(मात्रे / मातरं / मात्रा)

**उत्तर:** तेन बालिका तस्याः **मात्रे** प्रदत्ता।

७. मात्रा _______ आशीर्वचनं दत्तम्।

(तस्य / तस्मिन् / तस्मै)

**उत्तर:** मात्रा **तस्मै** आशीर्वचनं दत्तम्।

८. वत्स नरेन्द्र, विरम _______।

(शोकेन / शोकात् / शोकाय)

**उत्तर:** वत्स नरेन्द्र, विरम **शोकात्।**

**क. कः कं वदति? तद् लिखत।**

१. "विरम शोकात्।"

**उत्तर: माता नरेन्द्रं वदति।**

२. "त्वया बालिकायाः साहाय्यं कृत्वा शक्तिदेवतायाः एव पूजनं कृतम्।"

**उत्तर: माता नरेन्द्रं वदति।**

**ड. सत्यं वा असत्यं तद् लिखत।**

१. जिज्ञासुः बालनरेन्द्रः सदैव चिन्तामग्नः आसीत्।

**उत्तर: असत्यम्।**

२. अन्नपूर्णादेव्याः मूर्तिं क्रीत्वा नरेन्द्रः गृहमागच्छत्।

**उत्तर: असत्यम्।**

३. दुर्गापूजामहोत्सवः नाम शक्तिपूजनम्।

**उत्तर: सत्यम्।**

४. बालिका अश्वयानागमनविषये जानाति।

उत्तर: **असत्यम्।**

५. आत्मानमपराधिनं मत्वा नरेन्द्रः मात्रे सर्वमकथयत्।

उत्तर: **सत्यम्।**

**इ. उचितं कारणं चित्वा वाक्यं पुनर्लिखत।**

१. नरेन्द्रेण दुर्गादेव्याः मूर्तिः क्रीता । यतः _______

(दुर्गापूजामहोत्सवः आसीत्। /
तत्र शङ्कस्य मूर्तिः न आसीत्।)

**उत्तर:** नरेन्द्रेण दुर्गादेव्याः मूर्तिः क्रीता । यतः **दुर्गापूजामहोत्सवः आसीत्।**

२. नरेन्द्रस्य विचारमाला खण्डिता। यतः _______

(तेन गृहस्य मार्गः विस्मृतः। / तेन तुरगपदानां रवः श्रुतः।)

उत्तर: नरेन्द्रस्य विचारमाला खण्डिता। यतः **तेन तुरगपदानां रवः श्रुतः।**

३. _______ सः मार्गाद् दूरं गन्तुं प्रायतत।

(स्वसंरक्षणं कर्तुम् / मार्गे पाषाणाः आसन् अतः)

उत्तर: **स्वसंरक्षणं कर्तुं** सः मार्गाद् दूरं गन्तुं प्रायतत।

४. बालिका अश्वयानागमनविषये अनभिज्ञा यत: ______

(सा सुप्ता आसीत्। / सा खेलने मग्ना आसीत्।)

उत्तर: बालिका अश्वयानागमनविषये अनभिज्ञा यत: **सा खेलने मग्ना आसीत्।**

५. नरेन्द्रस्य हस्ताद् मूर्ति: पतिता। यत: ______

(तेन धावित्वा झटिति बालिका मार्गाद् दूरीकृता। / मूर्ते: भार: अधिक: आसीत्।)

उत्तर: नरेन्द्रस्य हस्ताद् मूर्ति: पतिता। यत: **तेन धावित्वा झटिति बालिका मार्गाद् दूरीकृता।**

६. ______ नरेन्द्र: मात्रे सर्वमकथयत्।

(माता बालिकायै क्रुध्येत् इति मत्वा / आत्मानम् अपराधिनं मत्वा)

उत्तर: **आत्मानम् अपराधिनं मत्वा** नरेन्द्र: मात्रे सर्वमकथयत्।

७. नरेन्द्रेण शक्तिपूजनमेव कृतम्। यत: ______

(तेन बालिकाया: साहाय्यं कृतम्। / स: मन्दिरं गतवान्।)

उत्तर: नरेन्द्रेण शक्तिपूजनमेव कृतम्। यत: **तेन बालिकाया: साहाय्यं कृतम्।**

## माध्यमभाषया स्वमतप्रकटनम्।

१. 'बालिकारूपशक्तिदेवताया: पूजनम्' इत्यस्य विषये भवत: मतं माध्यमभाषया प्रकटयतु।


उत्तर: 'द्वे कथे स्वामिविवेकानन्दस्य।' या पाठातील 'शक्तिपूजनम्।' या कथेत नरेंद्र म्हणजेच स्वामी विवेकानंदांच्या बालपणीचा एक प्रसंग आपल्याला पहावयास मिळतो. या कथेत त्यांची प्रसंगावधानता त्याचबरोबर उपकारी तसेच धार्मिक वृत्ती स्पष्ट होते.

एकदा बालपणी लहानग्या नरेंद्राने एका छोट्या मुलीचा जीव वाचविला परंतु याच प्रयत्नात असताना त्यांच्या हातून दुर्गादेवीची विकत घेतलेली मूर्ती भंग पावली. जेव्हा त्याने ही घटना आईला सांगितली, तेव्हा आईने त्याची समजूत काढताना सांगितले की उलटपक्षी त्याने मुलीला वाचवून मुलीच्या रूपातील शक्तिदेवतेचीच पूजा केली आहे. यामुळे प्रत्येक स्त्रीमध्ये शक्तिदेवतेचे अस्तित्व असते; हा विचार स्पष्ट होतो आणि म्हणूनच आपण तिचा मान राखला पाहिजे. स्त्री-पुरुष विषमता, स्त्रीभ्रूण हत्या इ. सामाजिक समस्या कमी करण्यासाठी हा विचार आत्मसात केला पाहिजे. हा विचार आपण 'केवळ देवतांची पूजा न करता मानवांचाही आदर केला पाहिजे', हा दृष्टिकोन देतो. कथेत मुलाच्या हातून मूर्ती जरी भंगली असली तरी त्याने एका मुलीचा जीव वाचविला. म्हणूनच त्याची आई त्याने मुलीच्या रूपातील देवतेची पूजा केली असे म्हणाली इतरांना मदत करणे, आपद्ग्रस्त व्यक्तीचा जीव वाचविणे, इतरांशी माणुसकीने वागणे, त्यांचा आदर करणे, त्यांची किंमत ठेवणे हे मनुष्यवर्तनाचे अतिशय महत्त्वाचे गुण आहेत. देवतांच्या पूजन व प्रार्थने बरोबरच प्रत्येकाने इतर मानवांशीही योग्य वर्तणूक केली पाहिजे.

अशाप्रकारे ही कथा 'जनसेवा हीच खरी ईश्वरसेवा' हा बोध देते. म्हणून प्रत्येकाने परोपकाराची संधी सोडता कामा नये. कारण परोपकार हा थेट ईश्वरापर्यंत पोहोचण्याचा मार्ग आहे. नरेन्द्राच्या आईप्रमाणे आपणही ही नैतिक मूल्ये भावी पिढ्यांकडे संक्रमित केली पाहिजेत व त्यांच्या मनावर बिंबविली पाहिजेत.

## पृथक्करणम्।

१. गद्यांशे आगतानि पूर्वकालवाचक-त्वान्त- अव्ययानि चित्वा जालरेखाचित्रं पूरयत।





उत्तर: १. क्रीत्वा। २. धावित्वा।

३. मत्वा। ४. कृत्वा।


## क्रमसंयोजनम्।

**१. घटनाक्रमानुसारं वाक्यानि संयोजयत।**

i.




उत्तर:



ii.

नरेन्द्रेण
- i. धावित्वा बालिका मार्गात् दूरीकृता।
- ii. दृष्टं यत् बालिका खेलने मग्ना अस्ति।
- iii. बालिका मात्रे प्रदत्ता।
- iv. दृष्टं यत् अश्वयानंमार्गे वेगेन धावति।।

उत्तर:

नरेन्द्रेण
- **i. दृष्टं यत् अश्वयानं मार्गे वेगेन धावति।**
- **ii. दृष्टं यत् बालिका खेलने मग्ना अस्ति।**
- **iii. धावित्वा बालिका मार्गात् दूरीकृता।**
- **iv. बालिका मात्रे प्रदत्ता।**

## शब्दज्ञानम्।

### अ. गद्यांशे पर्यायशब्दं चिनुत।

*१. प्रतिमा, पुत्तल: = **मूर्तिः।**

*२. हयः, तुरगः, घोटकः, सैन्धवः (घोडा) = **अश्वः।**

*३. पन्थाः, वर्त्म, अयनम्, अध्वा (रस्ता) = **मार्गः।**

*४. शब्दः, ध्वनिः, नादः, निनादः (आवाज) = **रवः।**

५. नित्यम्, सदा, निरन्तरम, सततम् (नेहमी) = **सदैव।**

६. जननी, जनयित्री, प्रसूः, जन्मदात्री (आई) = **माता।**

७. सदनम्, गेहम्, सद्म, निकेतनम् (घर) = **गृहम्।**

८. निमग्नः, तल्लीनः = **मग्नः।**

९. कन्या, बाला, कन्यका (मुलगी) = **बालिका।**

१०. अवलोक्य, दृष्ट्वा, वीक्ष्य (पाहून) = **विलोक्य।**

११. करः, पाणिः (हात) = **हस्तः।**

१२. उपासना, अर्चा, यजनम् (पूजा) = **पूजनम्, पूजा।**

### ब. गद्यांशे विपरितार्थकपदं चिनुत।

*१. अविचारी × **विचारशीलः।**

*२. शनैः, मन्दम् (हळूहळू) × **झटिति।** (लवकर)

३. विक्रीय × **क्रीत्वा।**

४. अगच्छत् × **आगच्छत् ।**

**क. समूहेतरं पदं चित्वा लिखत।**

१. विचारशील: मण्डलाधिकारिण:, चिन्तनमग्न:, जिज्ञासु:

उत्तर: **मण्डलाधिकारिण:।**

२. मत्वा, क्रीत्वा, खण्डिता, धवित्वा

उत्तर: **खण्डिता।**

३. पूजनम्, ज्ञातम्, दत्तम्, दृष्टम्

उत्तर: **पूजनम्।**

४. भग्ना, पतिता, दूरीकृता, माता

उत्तर: **माता।**

५. आसीत्, शोकात्, अभवत्, अकथयत्

उत्तर: **शोकात्।**

**ड. चतुर्थपदं लिखत।**

१. कृ : कृत्वा :: क्री : ______

उत्तर: कृ : कृत्वा :: क्री : **क्रीत्वा**

२. रवेण : रव: :: वेगेन : ______

उत्तर: रवेण : रव: :: वेगेन : **वेग:**

३. नरेन्द्र: : मग्न: :: बालिका : ______

उत्तर: नरेन्द्र: : मग्न: :: बालिका : **मग्ना**

४. पूजा : कृता :: पूजनम् : ______

उत्तर: पूजा : कृता :: पूजनम् : **कृतम्**

५. मार्गः : मार्गात् : : हस्तः : ________

उत्तर: मार्गः : मार्गात् : : हस्तः : **हस्तात्**

६. धन्या : माता : : धन्यः : ________

उत्तर: धन्या : माता : : धन्यः : **बालनरेन्द्रः**

**इ. धातुसाधित-अव्ययानां चयनम्।**

**१. गद्यांशे आगतं पूर्वकालवाचक-धातुसाधित-ल्यबन्त-अव्ययं चित्वा लिखत।**

**उत्तर:** विलोक्य।

**२. गद्यांशे आगतं हेत्वर्थक-धातुसाधित-तुमन्त-अव्ययं चित्वा लिखत।**

**उत्तर:** गन्तुम्।

**फ. सन्धिविच्छेदं कुरुत।**

*१. मात्रादिष्टम् = **मात्रा + आदिष्टम्।**

* २. मग्नोऽभवत् = **मग्नः + अभवत्।**

* ३. गृहमागतः = **गृहम् + आगतः।**

*४. तत्रैव = **तत्र + एव।**

५. मग्नास्ति = **मग्ना + अस्ति।**

६. आत्मानमपराधिनम् = **आत्मानम् + अपराधिनम्।**

७. धन्यश्च = **धन्यः + च।**

**ग. सन्धिं कुरुत।**

१. सदा + एव = **सदैव।**

२. गृहम् + आगच्छत् = **गृहमागच्छत्।**

३. यमयानम् + एव = **यमयानमेव।**


४. गृहम् + आगतः = **गृहमागतः।**

५. मात्रा + उक्तम् = **मात्रोक्तम्।**

**ह. विशेष्य-विशेषण – अन्वितिः।**

**१. सूचनानुसारं लिखत।**

१. बालनरेन्द्रस्य कृते प्रयुक्तानि विशेषणानि गद्यांशे चित्वा जालरेखाचित्रं पूरयत।




उत्तरः **१. जिज्ञासुः।** **२. विचारशीलः।**
**३. चिन्तनमग्नः।** **४. धन्यः।**

२ रिक्तस्थानपूर्तिं कुरुत।

i. सवेगम् अश्वयानम्।
________ अश्वः।

उत्तरः सवेगम् अश्वयानम्।
**सवेगः** अश्वः।

३. उचितविशेषणं लिखत।

i. ________ विचारमाला।

**उत्तरः खण्डिता** विचारमाला।

ii. ________ माता।

**उत्तरः धन्या** माता।

## अवबोधनम्।

**अ. एकवाक्येन उत्तरत।**

***१.** स्वामी विवेकानन्दः **कुत्र** गतः?

**उत्तरः** स्वामी विवेकानन्दः **वाराणसीं** गतः।

***२.** सः **कस्याः** देवतायाः मन्दिरम् अगच्छत्?

**उत्तरः** सः **देव्याः अन्नपूर्णायाः** देवतायाः मन्दिरम् अगच्छत्।

*३. **के** स्वामिनं मार्गे अन्वधावन्?

उत्तर: **केचन वानराः** स्वामिनं मार्गे अन्वधावन् ।

*४. याचकेन **कः** उपदेशः कृतः?

उत्तर: "**निर्भयतया तान् वानरान् अभिमुखो भव। तेन ते वानराः भीताः न त्वां पीडयिष्यन्ति।**" इति उपदेशः याचकेन कृतः।

५. स्वामिना वानराणां विषये **किं** ज्ञातम्?

उत्तर: **यदा स्वामी तिष्ठति तदा तेऽपि वानराः तिष्ठन्ति यदा सः चलति तदा वानराः तम् अनुगच्छन्ति इति** स्वामिना वानराणां विषये ज्ञातम्।

६. वानराः **कदा** स्वामिनं दंष्टुम् अधावन्?

उत्तर: **यदा स्वामिना पदप्रहारस्य अभिनयः कृतः तदा** वानराः तं दंष्टुम् अधावन्।

७. वानरान् मार्गाद् दूरीकर्तुं स्वामिना **कस्य** अभिनयः कृतः?

उत्तर: वानरान् मार्गाद् दूरीकर्तुं स्वामिना **पदप्रहारस्य** अभिनयः कृतः।

८. भीतः स्वामी **किं** कर्तुम् आरभत?

उत्तर: भीतः स्वामी **पलायितुम्** कर्तुम् आरभत।

९. **कस्यां** नगर्यां भाषमाणेन स्वामिना अयं प्रसङ्गः कथितः?

उत्तर: **न्यूयॉर्कनगर्याम्** भाषमाणेन स्वामिना अयं प्रसङ्गः कथितः।

**ब. मञ्जूषातः उचितं पर्यायं चित्वा रिक्तस्थानपूर्तिं कुरुत।**

*१. वानराः तस्य पृष्ठतः ________ ।

(अनुगच्छन्ति / अनुगच्छति / अनुगच्छथ)

उत्तर: वानराः तस्य पृष्ठतः **अनुगच्छन्ति**।

*२. स्वामी निश्चलः ________ । (जातः / जातम् / जाता)

उत्तर: स्वामी निश्चलः **जातः**।

*३. भीता: ________ दूरं पलायिता:।

(वानर: / वानरा: / वानरौ)

**उत्तर:** भीता: **वानरा:** दूरं पलायिता:।

४. वानरा अपि ________ अन्वधावन्। (तस्य / तेन / तम्)

**उत्तर:** वानरा अपि **तम्** अन्वधावन्।

५. ________ सभायां भाषमाणेन स्वामिना कथितोऽयं प्रसङ्गः।

(एकां / एकस्यां / एकस्मिन्)

**उत्तर:** **एकस्यां** सभायां भाषमाणेन स्वामिना कथितोऽयं प्रसङ्गः।

**क. क: कं वदति? तद् लिखत।**

१. "अलं पलायनेन।"

उत्तर: **याचक: स्वामिविवेकानन्दं वदति।**

२. "निर्भयतया तान् वानरान् अभिमुखो भव।"

उत्तर: **याचक: स्वामिविवेकानन्दं वदति।**

३. "प्रसङ्गेनानेन अवगत: मया महान् सिद्धान्त:।"

उत्तर: **स्वामिविवेकानन्द: सभां वदति।**

४. "आपदाभिमुखा: भवत।"

उत्तर: **स्वामिविवेकानन्द: सभां वदति।**

**ड. सत्यं वा असत्यं तद् लिखत।**

१. स्वामिविवेकानन्दः वाराणस्यां दुर्गादेव्याः मन्दिरं गतवान्।

उत्तरः **असत्यम्।**

२. यदा स्वामी तिष्ठति तदा ते वानराः चलन्ति।

उत्तरः **असत्यम्।**

३. स्वामिना पदप्रहारस्य अभिनयः कृतः।

उत्तरः **सत्यम्।**

४. स्वामी त्वरया पलायितुम् आरभत।

उत्तरः **सत्यम्।**

५. स्वामी निश्चलः अभिमुखः जातः तेन ते वानराः तं दंष्टुमधावन्।

उत्तरः **असत्यम्।**

६. स्वामी अवदत्, "आपदः प्रतिकारं कुरुत।"

उत्तरः **सत्यम्।**

**इ. उचितं कारणं चित्वा वाक्यं पुनर्लिखत।**

१. ________ स्वामी पलायितुमारभत।

(कठिनोऽयं प्रसङ्गः इति मत्वा /
व्यायामः आवश्यकः इति मत्वा)

उत्तरः **कठिनोऽयं प्रसङ्गः इति मत्वा** स्वामी पलायितुमारभत।

२. स्वामिनम् अनुगच्छन्तः वानराः तिष्ठान्ति। यतः ________

(अग्रे मार्गः एव नासीत्।/ स्वामी तिष्ठति।)

उत्तरः स्वामिनम् अनुगच्छन्तः वानराः तिष्ठान्ति। यतः **स्वामी तिष्ठति।**

३. _______ स्वामिना पदप्रहारस्य अभिनय: कृत:।

(वानरान् मार्गाद् दूरीकर्तुम् /
स्वस्य अभिनय क्षमता ज्ञातुम्)

उत्तर: **वानरान् मार्गाद् दूरीकर्तुं** स्वामिना पदप्रहारस्य अभिनय: कृत:।

४. भीता: वानरा: दूरं पलायिता:। यत: _______

(तत्र व्याघ्र: आयात:। / स्वामी निश्चल: अभिमुख: जात:।)

उत्तर: भीता: वानरा: दूरं पलायिता:। यत: **स्वामी निश्चल: अभिमुख: जात:।**

५. _______ आपदाभिमुखा: भवत।

(आपद: प्रतिकारं कर्तुम् / भवतां मुखं दर्शयितुम्)

उत्तर: **आपद: प्रतिकारं कर्तुम्** आपदाभिमुखा: भवत।

## माध्यमभाषया स्वमतप्रकटनम्।

१. 'आपद: प्रतिकारं कुरुत' इति स्वामिन: उक्ति: कथं योग्या तत् माध्यमभाषया स्पष्टीकुरुत।


उत्तर: 'द्वे कथे स्वामिविवेकानन्दस्य।' या पाठातील, 'आपदाभिमुखा: भवत।' या कथेत स्वामीजींच्या जीवनातील 'संकटापासून पळून जाण्यापेक्षा संकटांना सामोरे जावे.' ही शिकवण देणारा प्रसंग आला आहे.

'न्यूयॉर्क' मध्ये एक भाषण करताना स्वामीजींनी एक प्रेरणादायक प्रसंग सांगितला. एकदा काही वानरे त्यांचा पाठलाग करू लागली. जेव्हा त्यांनी त्यांच्यापासून पळून जाण्याचा प्रयत्न केला, तरी ती त्यांच्यामागे येतच होती. आणि जेव्हा ते त्यांना सामोरे गेले. तेव्हा मात्र ती पळून गेली. ही घटना त्यांना 'संकटांना सामोरे जावे आणि त्यांचा प्रतिकार करावा', हा पाठ शिकवून गेली. हे वचन आपल्या दैनंदिन जीवनात खूपच लागू पडते. आपण जेव्हा जेव्हा एखाद्या समस्येने ग्रस्त होतो; तेव्हा जबाबदारीने तिला सामोरे गेले पाहिजे आणि त्यावर उपाय शोधले पाहिजेत. आपण सकारात्मक दृष्टिकोन बाळगला पाहिजे. समस्येला न डगमगता प्रतिकार केला पाहिजे आणि परिणाम कसेही असोत त्यांचा स्वीकार केला पाहिजे. अनेकवेळा असे घडते की कही उपाय सहज उपलब्ध असतात परंतु समस्यांच्या भीतीपोटी आपण त्यांना पाहू शकत नाही. त्यांचे दुष्परिणाम आपले व्यक्तिमत्व, मानसिक क्षमता आणि भावनांक सुदृढ करतात. आधुनिक काळात अनेक क्षेत्रांत बुद्ध्यांकापेक्षा भावनांक महत्त्वपूर्ण मानला जातो. या स्पर्धाशील जगात भक्कम भावनांक ताण सहन करण्यासाठी उपयुक्त ठरतो. काहीवेळेस आपल्याला अपयश सहन करावे लागते. अशावेळी आपल्याला पूर्वानुभव उपयोगी पडतात.

संकटे दैवी किंवा मानुषीही असू शकतात. परंतु आपण त्यांना धैर्याने तोंड द्यावे. 'पलायन' हा उपाय असू शकत नाही. आपण हार मानू नये. समस्येला समजून घेणे व त्यावर मात करणे हाच एकमेव प्रगतीचा मार्ग आहे.

## पृथक्करणम्।

१. **गद्यांशं पठित्वा वृक्षरेखाचित्रं पूरयत।**





उत्तर: १. **गत्वा।** २. **प्रणम्य।**

३. **मत्वा।** ४. **दृष्ट्वा।**

५. **आकर्ण्य।** ६. **कृत्वा।**


२. **गद्यांशे आगतानि हेत्वर्थक-अव्ययानि चित्वा लिखत।**




उत्तर: १. **दूरीकर्तुम्।** २. **दंष्टुम्।**

३. **पलायितुम्।**

३. **गद्यांशे आगतानि वर्तमानकालवाचक-धातुसाधित-विशेषणानि चित्वा जालरेखाचित्रं पूरयत।**




**उत्तर: १. स्मरन्।** **२. निवर्तमान:।**

**३. गच्छता।** **४. पलायमानम्।**

**५. भाषमानेन।**

## क्रमसंयोजनम्।

**घटनाक्रमानुसारं वाक्यानि संयोजयत।**

१. i. स्वामी अन्नपूर्णाया: मन्दिरं गत:।

ii. यदा स्वामी तिष्ठति तदा वानरा: तिष्ठन्ति।

iii. स्वामी वाराणसीं प्राप।

iv. केचन वानरा: तम् अनुगच्छन्ति।

**उत्तर: i. स्वामी वाराणसीं प्राप।**

**ii. स्वामी अन्नपूर्णाया: मन्दिरं गत:।**

**iii. केचन वानरा: तम् अनुगच्छन्ति।**

**iv. यदा स्वामी तिष्ठति तदा वानरा: तिष्ठन्ति।**

२. i. भीता: वानरा: दूरं पलायिता:।

ii. भीत: स्वामी पलायितुम् आरभत।

iii. स्वामी निश्चल: अभिमुख: जात:।

iv. वानरा: स्वामिनम् अन्वगच्छन्।

**उत्तर: i. वानरा: स्वामिनम् अन्वगच्छन्।**

**ii. भीत: स्वामी पलायितुम् आरभत।**

**iii. स्वामी निश्चल: अभिमुख: जात:।**

**iv. भीता: वानरा: दूरं पलायिता:।**

३. i. स्वामी निश्चल: अभिमुख: जात:।

ii. वानराणाम् अनुगमनम्।

iii. सभायां स्वामिना कथितम् "आपदाभिमुख: भवत।"

iv. याचकेन उपदेश: कृत: "निर्भयतया अभिमुखो भव।"

**उत्तर: i. वानराणाम् अनुगमनम्।**

**ii. याचकेन उपदेश: कृत: "निर्भयतया अभिमुखो भव।"**

**iii. स्वामी निश्चल: अभिमुख: जात:।**

**iv. सभायां स्वामिना कथितम् "आपदाभिमुख: भवत।"**

## शब्दज्ञानम्।

**अ. गद्यांशे आगतं समानर्थकपदं चित्वा लिखत।**

*१. मर्कटाः, कपयः, प्लवङ्गाः, शाखामृगाः (माकडे) = **वानराः।**

*२. पन्थाः, अयनम्, वर्त्म, अध्वा (रस्ता) = **मार्गः।**

३. नत्वा, वन्दित्वा (वंदन करून) = **प्रणम्य।**

४. देवालयः, आयतनम् (देऊळ) = **मन्दिरम्।**

५. सरः, सरोवरम्, कासारः (तळे) = **तडागः।**

६. भयभीतः, भयाकुलः, भयग्रस्तः (घाबरलेला) = **भीतः।**

७. शीघ्रम्, सत्वरम्, झटिति (लवकर) = **त्वरया।**

८. अवदत्, अभणत्, अगदत् (म्हणाला) = **अभाषत।**

९. अचलः, स्तब्धः (स्थिर) = **निश्चलः।**

१०. श्रुत्वा, निशम्य (ऐकून) = **आकर्ण्य।**

**ब. गद्यांशे आगतं विपरितार्थकपदं चित्वा लिखत।**

*१. आगम्य, आगत्य (येऊन) × **गत्वा।** (जाऊन)

*२. पुरतः (समोर) × **पृष्ठतः।** (मागे)

*३. सम्पदः (सम्पत्ती) × **आपदः।** (विपत्ती)

*४. पराङ्मुखः × **अभिमुख।**

*५. सुगमः, सरलः (सोपे) × **कठिनः।** (अवघड)

६. विस्मरन् × **स्मरन्।**

७. एकतः (एका बाजूने) × **अपरतः।** (दुसऱ्या बाजूने)

८. चलः, चञ्चलः × **निश्चलः।**

**क. समूहेतरपदं लिखत।**

१. दंष्टुम्, स्मरन्, पलायितुम्, दूरीकर्तुम्

उत्तर: **स्मरन्।**

२. भीतः अभिमुखः तडागः, निश्चलः

उत्तर: **तडागः।**

३. गच्छता, भाषमाणेन, निवर्तमानः, पलायमानम्

उत्तर: **गच्छता।**

४. तिष्ठति, अनुगच्छन्ति, चलति, पीडयिष्यन्ति

उत्तर: **पीडयिष्यन्ति।**

५. दृष्ट्वा, गत्वा, प्रणम्य, कृत्वा

उत्तर: **प्रणम्य ।**

६. आरभत, भवत, कुरुत, भव

उत्तर: **आरभत ।**

७. आरभत, अधावन्, अन्वभवत्, चलति

उत्तर: **चलति।**

८. पृष्ठतः, जातः, उच्चैः, एकतः

**उत्तरः जातः।**

## ड. चतुर्थपदं लिखत।

१. प्र + नम् : प्रणम्य :: आ + कर्ण् : ______

**उत्तरः** प्र + नम् : प्रणम्य :: आ + कर्ण् : **आकर्ण्य**

२. निर्भयतया : निर्भयता :: त्वरया : ______

**उत्तरः** निर्भयतया : निर्भयता :: त्वरया : **त्वरा**

३. एक : एकतः :: अपर : ______

**उत्तरः** एक : एकतः :: अपर : **अपरतः**

४. कठिनोऽयम् : कठिनः +अयम् :: कथितोऽयम् : ______

**उत्तरः** कठिनोऽयम् : कठिनः +अयम् :: कथितोऽयम् :

**कथितः** + **अयम्**

५. तिष्ठन्ति : तिष्ठति :: चलन्ति : ______

**उत्तरः** तिष्ठन्ति : तिष्ठति :: चलन्ति : **चलति**

६. जन् - जा : जातः :: कृ : ______

**उत्तरः** जन् - जा : जातः :: कृ : **कृतः**

**इ. धातुसाधित-अव्ययानां चयनम्।**

**१. गद्यांशे आगते पूर्वकालवाचक-धातुसाधित-ल्यबन्त-अव्यये चित्वा लिखत।**

**उत्तर:** i. प्रणम्य। ii. आकर्ण्य।

**फ. सन्धिविच्छेदं कुरुत।**

१. विस्मयजनकमन्वभवत् = **विस्मयजनकम् + अन्वभवत्।**

२. तेऽपि = **ते + अपि।**

३. तमनुगच्छन्तीति = **तम् + अनुगच्छन्ति + इति।**

४. कठिनोऽयम् = **कठिन: + अयम्।**

५. उच्चैरभाषत = **उच्चै: + अभाषत।**

६. प्रसङ्गेनानेन = **प्रसङ्गेन + अनेन।**

**ग. सन्धिं कुरुत।**

१. दंष्टुम् + अधावन् = **दंष्टुमधावन्।**

२. क:+ अपि = **कोऽपि।**

३. तत् + आकर्ण्य = **तदाकर्ण्य।**

४. कथित: + अयम् = **कथितोऽयम्।**

५. स:+ अवदत् = **सोऽवदत्।**

## ह. विशेष्य-विशेषण – अन्विति:।

### १. विशेष्य - विशेषणानां मेलनं कुरुत।

| | 'अ' गट | | 'ब' गट |
|---|---|---|---|
| i. | आसीन: | अ. | प्रसङ्ग: |
| ii. | भीता: | ब. | भित्तिका |
| iii. | कठिन: | क. | वानरा: |
| iv. | उन्नता | ड. | याचक: |

**उत्तर: i. आसीन: याचक:।**

**ii. भीता: वानरा:।**

**iii. कठिन: प्रसङ्ग:।**

**iv. उन्नता भित्तिका।**

### २. योग्यं विशेषणं लिखित्वा रिक्तस्थानपूर्तिं कुरुत।

i. उन्नता भित्तिका।

________वृक्ष:।

________भवनम्।

**उत्तर:** उन्नता भित्तिका।

**उन्नत:** वृक्ष:।

**उन्नतं** भवनम्।

ii. कठिन: प्रसङ्ग:।

________ भाषा।

________ कार्यम्।

**उत्तर:** कठिन: प्रसङ्ग:।

**कठिना** भाषा।

**कठिनम्** कार्यम्।

iii. भीता: वानरा:।

________ वानरौ।

________ वानर:।

**उत्तर:** भीता: वानरा:।

**भीतौ** वानरौ।

**भीत:** वानर:।

**सूचनानुसारं परिवर्तनं कुरुत।**

*१. वत्स नरेन्द्र, विरम शोकात्। ('विरम' पदस्य स्थाने 'अलम्' प्रयोजयत।)

उत्तर: वत्स नरेन्द्र, **अलं शोकेन**।

**स्पष्टीकरण – 'अलम्' या अव्ययाचा 'पुरे' असा अर्थ असताना तृतीयेची अपेक्षा असते.**

**∴ शोकेन – 'शोक' – तृतीया एकवचन.**

*२. अश्वयानं मार्गे वेगेन धावति। (बहुवचने लिखत।)

उत्तर: **अश्वयानानि** मार्गे वेगेन **धावन्ति**।

**स्पष्टीकरण –**

कर्ता (तृतीयपुरुष: एकवचनम्) — क्रियापदम् – वर्तमानकाल: (तृतीयपुरुष: एकवचनम्)

अश्वयानं मार्गे वेगेन धावति।

↓ ↓

अश्वयानानि मार्गे वेगेन धावन्ति।

कर्ता (तृतीयपुरुष: बहुवचनम्) — क्रियापदम् – वर्तमानकाल: (तृतीयपुरुष: बहुवचनम्)

*३. स्वामिना पदप्रहारस्य अभिनयः कृतः। (प्रयोगपरिवर्तनं कुरुत।)

**उत्तर: स्वामी पदप्रहारस्य अभिनयं कृतवान्।**

**स्पष्टीकरण –**

| | | | | | |
|---|---|---|---|---|---|
| कर्ता | | कर्म | कर्मणि-भू-धा-वि | = | कर्मणि-प्रयोगः |
| ३ | | १ | १ | | |
| स्वामिना | पदप्रहारस्य | अभिनयः | कृतः। | | |
| ↓ | | ↓ | ↓ | | |
| स्वामी | पदप्रहारस्य | अभिनयं | कृतवान्। | | |
| १ | | २ | १ | | |
| कर्ता | | कर्म | कर्तरि-भू-धा-वि | = | सकर्मक कर्तरि -प्रयोगः |

*४. मा भैषीः। ('मा' अव्ययस्य स्थाने 'अलम्' उपयोजयत।)

**उत्तर: अलं भयेन।**

**स्पष्टीकरण – अभैषीः = 'भी'** ३ परस्मैपदम्, **तृतीयभूतकालः, तृतीयपुरुषः एकवचनम्**

∴ **'भयम्' हे नाम 'भी' (३ परस्मैपदम्) पासून आहे.**

**'अलम्' या अव्ययास 'पुरे' असा अर्थ असताना तृतीयेची अपेक्षा असते.**

५. तेन सा बालिका अश्वमार्गाद् दूरीकृता। (प्रयोगपरिवर्तनं कुरुत।)

**उत्तर: सः तां बालिकाम् अश्वमार्गाद् दूरीकृतवान्।**

**स्पष्टीकरण –**

| | | | | | | |
|---|---|---|---|---|---|---|
| कर्ता | (विशेषणम् | कर्म) | | कर्मणि-भू-धा-वि | = | कर्मणि-प्रयोगः |
| ३ | १ | १ | | १ | | |
| तेन | सा | बालिका | अश्वमार्गाद् | दूरीकृता। | | |
| ↓ | ↓ | ↓ | | ↓ | | |
| सः | तां | बालिकाम् | अश्वमार्गाद् | दूरीकृतवान्। | | |
| १ | २ | २ | | १ | | |
| कर्ता | (विशेषणम् | कर्म) | | कर्तरि-भू-धा-वि | = | सकर्मक कर्तरि -प्रयोगः |

६. मात्रा तस्मै आशीर्वचनं दत्तम्। (प्रयोगपरिवर्तनं कुरुत।)

**उत्तर: माता तस्मै आशीर्वचनं दत्तवती।**

**स्पष्टीकरण –**

| | | | | |
|---|---|---|---|---|
| कर्ता | | कर्म | कर्मणि-भू-धा-वि | = कर्मणि-प्रयोगः |
| ३ | | १ | १ | |
| मात्रा | तस्मै | आशीर्वचनं | दत्तम्। | |
| ↓ | | ↓ | ↓ | |
| माता | तस्मै | आशीर्वचनं | दत्तवती। | |
| १ | | २ | १ | |
| कर्ता | | कर्म | कर्तरि-भू-धा-वि | = सकर्मक कर्तरि -प्रयोगः |
| **(स्त्रीलिङ्गम्, प्रथमा एकवचनम्)** | | | **(स्त्रीलिङ्गम्, प्रथमा एकवचनम्)** | |

७. आत्मानमपराधिनं मत्वा स मात्रे सर्वमकथयत्। (पूर्वकालवाचकं निष्कासयत।)

**उत्तर:** स आत्मानमपराधिनम् **अमन्यत** मात्रे सर्वमकथयत् **च**।

**स्पष्टीकरण –** वाक्यातील पूर्वकालवाचक अव्यय – मत्वा = 'मन' ४ आत्मनेपद.

वाक्यातील क्रियापदाचा काळ/अर्थ, पुरुष, वचन ओळखावे.

अकथयत् = प्रथमभूतकालः, तृतीयपुरुषः एकवचनम्

'मन्' या धातूचे त्याच काळ, पुरुष, वचनाप्रमाणे रूप करावे.

शेवटच्या क्रियापदानंतर 'च' हे अव्यय योजावे.

आवश्यकतेनुसार शब्दांची फेरमांडणी करावी.

८. ते भीताः वानराः दूरं पलायिताः। (एकवचने लिखत।)

**उत्तर: सः भीतः वानरः दूरं पलायितः।**

**स्पष्टीकरण –**

| | | | | |
|---|---|---|---|---|
| सर्वनाम (पुंलिङ्गम्, प्रथमा बहुवचनम्) | विशेषणम् (पुंलिङ्गम्, प्रथमा बहुवचनम्) | कर्ता (पुंलिङ्गम्, प्रथमा बहुवचनम्) | | कर्मणि-भू-धा-वि (पुंलिङ्गम्, प्रथमा बहुवचनम्) |
| ते | भीताः | वानराः | दूरं | पलायिताः। |
| ↓ | ↓ | ↓ | | ↓ |
| सः | भीतः | वानरः | दूरं | पलायितः। |
| सर्वनाम (पुंलिङ्गम्, प्रथमा एकवचनम्) | विशेषणम् (पुंलिङ्गम्, प्रथमा एकवचनम्) | कर्ता (पुंलिङ्गम्, प्रथमा एकवचनम्) | | कर्मणि-भू-धा-वि (पुंलिङ्गम्, प्रथमा एकवचनम्) |